

# ९ क्षेत्रीय-संस्कृतीनां सर्जनम्

जनानां वर्गीकरणस्य कश्चन सरलतमोपायः वर्तते, यत् तेषां व्यवहारिक्या भाषया तेषां परिभाषीकरणम् । यदा वयं कमपि जनं तमिलः अथवा बङ्गः इति व्यवहरामः, तदा अस्य सामान्यार्थः भवति अयं जनः तमिल्भाषाम् अथवा बङ्गभाषां वदति, तथा च तमिल्नाडुप्रदेशे अथवा बङ्गालप्रदेशे निवसति। वयं प्रत्येकं क्षेत्रं केनचित् विशिष्टप्रकारकेण भोजनेन, वस्त्रेण, काव्येन, नृत्येन, सङ्गीतेन तथा च चित्रकलया योजयामः । यदा-कदा वयम् एतादृशीं संस्कृतिं मत्वा चलामः, तथा च चिन्तयामः, यत् एताः संस्कृतयः युग-युगान्तरेभ्यः अस्तित्वे सन्ति । परन्तु विभिन्नक्षेत्राणां मध्ये विभाजक-सीमानां प्रादुर्भावसमयस्य भूमिका आसीत् । यां वयम् अद्य क्षेत्रीयसंस्कृतिम् अवगच्छामः, सा (संस्कृतिः) कालप्रभावात् परिवर्तिता वर्तते (वस्तुतः एषा अद्यापि परिवर्तमाना वर्तते) इमाः क्षेत्रीय-संस्कृतयः जटिलप्रक्रियया विकसिता अभूवन् । अस्याः प्रकियायाः परिप्रेक्ष्ये स्थानीयपरम्पराणाम् उपमहाद्विपस्य अन्यभागस्थविचाराणाम् आदान-प्रदानेन पारस्परिकसाहाय्यम् अभवत् । यथा वयं पश्यामः काश्चित् परम्पराः तु केषाञ्चित् विशेषक्षेत्राणां स्वस्य सन्ति, तथा च काश्चित् अन्याः परम्पराः विभिन्नक्षेत्रेषु समानाः प्रतीयन्ते । परन्तु एतत् अतिरिच्य काश्चित् अन्याः परम्पराः कस्यचित् क्षेत्रविशेषस्य प्राचीनाभ्यः क्षेत्रीयपरम्पराभ्यः उत्पन्नाः, परन्तु अन्यस्मिन् क्षेत्रे गत्वा ताभिः किञ्चन नवीनं रूपं प्राप्तं भवति ।

? अन्विष्यन्तु यत् विगतदशवर्षेषु कियन्ति नूतनराज्यानि अभवन्, किम् एतेषु प्रत्येकं राज्यं किञ्चन स्वतन्त्रं क्षेत्रं वर्तते ?

## चेरभाषायाः तथा च मलयालमभाषायाः विकासः

आगच्छन्तु, भाषाक्षेत्रयोः मध्ये अन्तःसम्बन्धस्य एकेन उदाहरणेन स्वकीयं विश्लेषणं कुर्मः। नवमशताब्द्यां महोदयपुरम् इत्यस्य चेरराज्यस्य संस्थापना प्रायद्वीपस्य दक्षिणपश्चिमभागे अभवत्, यः अद्यतनस्य केरलराज्यस्य कश्चन सम्भागः अस्ति । संभवतः जनाः मलयालमभाषां अस्मिन् क्षेत्रे व्यवहरन्ति स्म। शासकाः मलयालमभाषायाः एवञ्च लिप्याः प्रयोगः स्वकीयाभिलेखेषु कृतवन्तः । वस्तुतः अस्याः भाषायाः प्रयोगः उपमहाद्वीपस्य सर्वकारीयेषु अभिलेखेषु कस्याश्चित् क्षेत्रीयभाषायाः प्रयोगस्य सर्वप्रथमोदाहरणेषु अन्यतमः अस्ति।



**चित्रम् -१ मलयालमे विरचितः आरम्भिकः केरलस्य कश्चन अभिलेखः**

सहैव चेरजनाः संस्कृतस्य परम्पराभ्यः अपि बहून् अंशान् गृहीतवन्तः। केरलस्य **मन्दिररंगमञ्चम्,** यस्यपरम्परा एतद्युगपर्यन्तम् अन्वेष्टुं शक्यते, संस्कृतस्य महाकायेषु आधृता आसीत् । मलयालमभाषायाः प्रथमसाहित्यिककृतयः यासां कालः द्वादशशताब्दीं जनाः मन्यते, प्रत्यक्षरूपेण संस्कृतस्य ऋणिन्यः वर्तन्ते। इदम् अपि किञ्चन अतीव रुचिकरं तथ्यं वर्तते यत् चतुर्दशशताब्द्याः एकः ग्रन्थः **लीलातिलकम्,** यः व्याकरणस्य तथा काव्यशास्त्रस्य च विषयसंम्बद्धः वर्तते, **मणिप्रवालम्** इत्यस्यां शैल्यां लिखितः आसीत्। मणिप्रवालस्य शाब्दिकार्थः- हीरकम्, तथा च प्रवालम् इति। यः अत्र द्वयोः भाषयोः संस्कृतक्षेत्रीयभाषयोः सहप्रयोगं प्रति संकेतं करोति।

*अन्विष्यन्तु यत् भवतः गृहे भवन्तः याः भाषाः वदन्ति, तासां लेखने सर्वप्रथमं प्रयोगः कदा जातः स्यात् ।*

## शासकाः तथा च धार्मिकपरम्पराः - जागन्नाथसम्प्रदायः

अन्यक्षेत्रेषु क्षेत्रीयाः संस्कृतयः क्षेत्रीयधार्मिकपरम्परातः विकसिताः अभूवन् । अस्याः प्रक्रियायाः सर्वोत्तमम् उदाहरणं वर्तते, पुरी इति । ओडिसाप्रदेशे जगन्नाथस्य सम्प्रदायः (जगन्नाथस्य शाब्दिकार्थः वर्तते, संसारस्य स्वामी यः विष्णोः पर्यायवाची अस्ति) । एतावत्कालपर्यन्तं जगन्नाथस्य काष्ठप्रतिमा स्थानीयजनजातिजनैः निर्मीयते, येन इदं तात्पर्यं भवति यत् जगन्नाथमूलतः एकः स्थानीयदेवता आसीत्, कालान्तरे तस्यैव मान्यता विष्णुरूपेण अभवत्।

द्वादशशताब्द्यां गङ्गवंशस्य कश्चन अत्यन्तः प्रतापी राजा अनन्तवर्मनः पुर्यां पुरुषोत्तमजगन्नाथस्य कृते कस्यचित् मन्दिरस्य निर्माणार्थं निश्चयं कृतवान् । राजा अनङ्गभङ्ग-तृतीयः १२३० तमे स्वकीयं राज्यं पुरुषोत्तम-जगन्नाथाय अर्पितवान्, तथा च आत्मानं जगन्नाथस्य "प्रतिनियुक्तम्" इति समुदघोषयत्।

**चित्रम् -२ बलभद्र-सुभद्रा-जगन्नाथानां लघुमूर्तयःतालपत्रस्य पाण्डुलिपिः (ओडिसाप्रदेशः)**





कालान्तरे यदा यदा इदं मन्दिरं प्रसिद्धतीर्थस्थलरूपेण विख्यातम् अभवत्, तदा सामाजिक-राजनैतिकदृष्ट्या अपि महत्त्वपूर्णम् अभवत् । येन केनापि ओडिसाप्रदेशः विजितः, यथा मुगलवंशीयेन, मराठासाम्राज्येन, ईस्ट-इण्डिया-कम्पनी इत्यनेन, सर्वे अस्मिन् मन्दिरे स्वकीयनियन्त्रण-संस्थापनार्थं प्रायतन्त । ते इदम् अनुभवं कुर्वन्ति स्म, यत् मन्दिरे नियन्त्रणे सति स्थानीयजनेषु तेषां शासनं स्वीकृतं भविष्यति ।

**चित्रम् - ३**
**जगन्नाथमन्दिरम्, पुरी**

### राजपुत्राः(राजपूत) तथा च शूरवीरतायाः परम्पराः

उनविंशशताब्द्यां ब्रिटिशजनाः तत् क्षेत्रम् “यत्र अद्यतनस्य राजस्थानस्य भूयान् भागः अवस्थितः अस्ति राजपूताना इति कथयन्ति स्म । एतेन एतज्ज्ञातुं शक्नुमः, यत् सः एकः एतादृशः प्रदेशः आसीत्, यत्र केवलम् अथवा प्रमुखरूपेण राजपुत्राः एव निवसन्ति स्म, परन्तु इयं वार्ता आंशिकरुपेण एव सत्यम् अस्ति । एतादृशाः अनेके समूहाः आसन् (अद्यापि वर्तन्ते), ये उत्तरभारतस्य मध्यवर्तिभारतस्य च अनेकेषु क्षेत्रेषु आत्मानं राजपुत्रं मन्यन्ते । इदम् अपि सत्यं वर्तते, यत् राजस्थाने राजपुत्राणाम् अतिरिक्ताः अन्ये जनाः अपि निवसन्ति । तथापि, प्रायशः इदं मन्यते, यत् राजपुत्राः राजस्थानाय काञ्चित् एकां विशिष्टसंस्कृतिं प्रदत्तवन्तः ।

एताः सांस्कृतिकपरम्पराः तत्रत्यानां शासकानाम् आदर्शैः सह तथा च अभिलाषैः सह सघनतया युक्ताः आसन् । प्रायः अष्टमशताब्द्याः आरभ्य अद्यतनराजस्थानस्य अधिकेषु भागेषु विभिन्नकुटुम्बानां राजपुत्रराज्ञां शासनम् आसीत् । पृथ्वीराजः (द्वितीयेऽध्याये) कश्चन एकः एतादृशः एव शासकः आसीत् । एते शासकाः एतादृशानां शूरवीराणाम् आदर्शान् स्वहृदि संस्थापयन्ति स्म, ये वीराः रणक्षेत्रे वीरतापूर्वकं युध्यमानाः प्रायः पराजयस्य अपेक्षया मृत्योः वरणं कृतवन्तः किन्तु रणक्षेत्रात् पलायनं न कृतवन्तः ।



*चित्रसंख्या-४,*
*बीकानेरस्य राजकुमार-राजसिंहः*

राजपुत्रशूरवीराणां कथाः काव्येषु गीतेषु च सुरक्षिताः वर्तन्ते, इमानि गीतानि प्रायः प्रशिक्षित-चारणभटैः गीयन्ते । एतानि काव्यगीतानि एतादृशानां शूरवीराणां स्मृतिं संरक्षयन्ति, तथा च तैः काव्यगीतादिभिः आशास्यते यत् एतेन अन्ये जनाः अपि शूरवीराणाम् अनुकरणार्थं प्रेरिताः तथा च प्रोत्साहिताः भविष्यन्ति । सामान्यजनाः अपि एतया वीरगाथया आकर्षिताः भवन्ति । एतासु कथासु प्रायः नाटकीयतथ्यानां तथा च स्वामिभक्ति-मित्रता-प्रेम-शौर्य-क्रोधादीनां, प्रबल-संवेगानां चित्रणं भवति स्म ।

किम्, एतासु कथासु स्त्रीणाम् अपि स्थानं भवति स्म ? आम्, यदा कदा ताः स्त्रियः विवादकारणरूपेण विद्यमानाः सन्ति, यदा पुरुषाः स्त्रीणां जयार्थं तासां संरक्षणार्थं वा परस्परं युध्यन्ते स्म । कुत्रचित् इदमपि चित्रितं वर्तते, यत् स्त्रियः स्वकीयशूरवीरपतीनां जीविते मृते च उभयथा अनुसरणं कुर्वन्ति स्म । **सतीप्रथा** अर्थात् विधवास्त्रीभिः जीवितासु सतीषु अपि स्वमृतकपतीनाम् अग्निचितायां आत्मदाहस्य अपि उल्लेखः प्राप्यते । एतेन प्रकारेण जनाः शूरवीरतायाः आदर्शान् पालयन्ति, तैः प्रायः आदर्शार्थम् आत्मबलिदानं करणीयं भवति स्म ।

*मानचित्रम् – १ तत् क्षेत्रं यस्य विषये अस्मिन् अध्याये चर्चा कृता अस्ति ।*



? जानन्तु यत् किं भवतां नगरे ग्रामे वा वीराणां वीराङ्गणानां च परम्परा आसीत् ? यदि आम्, तर्हि एताः परम्पराः राजपूतानां वीरतापूर्णादर्शैः कियन्तीं साम्यताम् अथवा भिन्नतां भजन्ते ?

## क्षेत्रीयसीमान्तेभ्यः परे – कत्थकनृत्यस्य कथा

यदि शूरवीरतायाः परम्पराः विभिन्नक्षेषु विभिन्नरूपेण प्राप्तुं शक्यन्ते, तदा नृत्यस्य विषयेऽपि इदमेव सत्यं वर्तते। आगच्छन्तु, नृत्यस्य एकं रूपं **कत्थक** इत्यस्य इतिहासं पश्यामः। इयं नृत्यशैली उत्तरभारतस्य अनेकभागैः सम्बद्धा अस्ति। कत्थकशब्दः कथाशब्देन निष्पन्नः वर्तते, यस्य प्रयोगः संस्कृतादीषु भाषासु आख्यायिकायाः कृते भवति। कत्थकः मूलरूपेण उत्तरभारतस्य मन्दिरेषु आख्यायिकां वदतां जनानां कश्चन एकः समुदायः आसीत्। एते कथाकाराः स्वकीयाभिनेन संङ्गीतैः च स्वकथावाचनम् अलङ्कुर्वन्ति स्म। पञ्चदशशताब्द्यां तथा च षोडशशताब्द्यां भक्तेः आन्दोलनस्य प्रसारेण सह कत्थक इति कस्याश्चित् विशिष्टनृत्यशैल्याः रूपे परिवर्तमानः आसीत्। राधाकृष्णयोः पौराणिकानाम् आख्यानां प्रस्तुतिकरणं लोकनाट्यरूपेण क्रियते स्म, यस्य नाम 'रासलीला' इति उच्यते। रासलीलायां लोकनृत्येन सह कत्थक-कथाकारस्य मूलाभिनयः अपि सम्बद्धः भवति स्म।

मुगलसम्राजां तथा च तेषाम् अभिजातानां शासनकाले कत्थकनृत्यस्य प्रस्तुतिः राजभवने भवति स्म। अस्य नृत्यस्य वर्तमानानि अभिलक्षणानि विकसितानि तथा च केनचित् विशिष्टशैलीरूपेण विकसितम्। कालेन इदं द्विविधपरम्परायां विभक्तम् अभवत्। राजस्थानस्य जयपुरीयशैल्यां (जयपुरघराना) तथा च लक्ष्मणपुरीयशैल्यां (लखनऊ घराना)। इदम् अवधप्रान्तस्य अन्तिमशासकस्य वाजिद-अलीशाहस्य संरक्षणे प्रमुखकलारूपेण प्रतिष्ठितम्। इदम् १८५०-१८७५ इति कालावधौ नृत्यशैलीरूपेण जयपुरलक्ष्मणपुरयोः क्षेत्रे एव न अपितु अद्यतनानां पञ्जाब-हरियाणा-जम्बूकश्मीर-मध्यप्रदेशानां निकटवर्तिक्षेत्रेषु अपि दृढतया संस्थापितम् अभूत्। शनैः शनैः अस्य प्रस्तुतौ क्लिष्टस्य एवञ्च द्रुतस्य पदसञ्चालनस्य, उत्तमवेशभूषायायाः, कथानां प्रस्तुतीकरणस्य अभिनयस्य च महत्त्वं वर्धितम्। उनविंशतिशताब्द्यां तथा च विंशतिशताब्द्याम् अधिकाः ब्रिटिशप्रशासकाः अनेकविधानां सांस्कृतिक-गतिविधीनाम् इव कत्थकनृत्ये अपि अरुचिः विज्ञापितवन्तः, तथापि इदं नृत्यं स्वतन्त्रतायाः अन्तरम् अस्य मान्यता षट्शास्त्रीय-नृत्यरूपेण अभवत्। स्वातन्त्र्योत्तरम् अस्य मान्यता षट्शास्त्रीय-नृत्यरूपेण अभूत्।



***नृत्यस्य कक्षा, लक्ष्मणमन्दिरम्, खजुराहो।***

## शास्त्रीयं नृत्यम्

कीदृशी कला शास्त्रीया भवेत् ? अस्य प्रश्नस्योत्तरं प्रायः अतीव क्लेशाय भवति। किं वयं तादृशं रूपं शैलीं वा शास्त्रीयम् इति वदामः, यस्य विषयः धार्मिकः भवेत् ? अथवा किम् एतत् शास्त्रीयम् एतदर्थं मन्यामहे, यत् यस्मिन् अत्यधिककौशलस्य आवश्यकता भवति, यत् कौशलम् अनेकैः वर्षैः प्राप्यते । अथवा एतदर्थं शास्त्रीयं भवति यतोहि एतत् निर्धारितनियमानाम् अनुगुणं प्रदर्शितं प्रस्तुतं च भवति तथा च विवधतायै प्रोत्साहनं न दीयते ? एते एतादृशाः प्रश्नाः सन्ति, येषु विचारः परमावश्यकः, इदम् अपि स्मर्तव्यम् अस्ति यत् बहूनि नृत्यानि यानि लोकनृत्यानि इति सन्ति, तेषु ताः समानताः सन्ति याः शास्त्रीय-नृत्यानां विशिष्टानि लक्षणानि सन्ति । यद्यपि शास्त्रीयम् इति विशेषणस्य प्रयोगः तेषां कलारूपाणां श्रेष्ठतायाः अभिज्ञापकं भवितुं शक्नोति, तथापि इदं सर्वदा शब्दशः सत्यं न भवति।

अन्यानि नृत्यरूपाणि सम्प्रति एषां गणना शास्त्रीयेषुनृत्येषु भवति, तेषां नामानि-
भरतनाट्यम् (तमिलनाडु)
कथाकली (केरलम्)
ओडिसी (उडिसा)
कुचिपुडि (आन्ध्रप्रदेशः)
मणिपुरी (मणिपुरम्)



? एतेषु कस्यचित् एकस्य नृत्यस्य विषये सम्पूर्णं ज्ञानं कुर्वन्तु।

### संरक्षकेभ्यः चित्रकला- लघुचित्राणां परम्परा

एका अन्या परम्परा या विभिन्नरीतिभ्यः पुष्पिता पल्लविता च वर्तते, सा आसीत् लघुचित्राणां परम्परा। लघुचित्राणि ( नाम्नैव अर्थबोधः भवति ) लघ्वाकारस्य चित्राणि भवन्ति, येषां निर्माणं सामान्यतः जलयुक्तवर्णैः वस्त्रेषु अथवा कर्गदेषु भवति । प्राचीनतमलघुचित्राणि तालपत्रेषु अथवा काष्ठस्य फलकेषु चित्रितानि आसन्। एतेषु सुन्दरतमानि चित्राणि, यानि पश्चिमभारते प्राप्तजैनग्रन्थान् सचित्रीकर्तुं प्रयुक्तानि आसन्। अकबर-जहागीर-शाहजहाँ इत्यादिभिः मुगलशासकैः अतिकुशलचित्रकारेभ्यः संरक्षणं दत्तम् आसीत् ये प्राथमिकरूपेण इतिहासानां काव्यानां च पाण्डुलिपीः चित्रयन्ति स्म । एताः पाण्डुलिपयः सामान्यतः गहनवर्णैः चित्रिताः क्रियन्ते स्म, तथा च तासु प्रासादस्य युध्यस्य मृगयायाः च दृश्यं, सामाजिकजीवनस्य अन्यान्यपि वस्तूनि चित्रयन्ति स्म । प्रायशः उपहाररूपेण एतेषां चित्राणाम् आदान-प्रदानं क्रियते स्म , तथा च एतानि चित्राणि राजभिः तथा च अन्तरङ्गजनैः एव द्रष्टुं शक्यन्ते स्म।

*चित्रम् - ७*
*मृगयायाः काले विश्रान्तिं कुर्वन् मुगलसम्राट् अकबरः*



मुगलसाम्राज्यस्य पतनेन सह अनेके चित्रकाराः मुगलसाम्राज्यं परित्यज्य नवीनोदीयमान-क्षेत्रीय-राज्यानां साम्राज्यं गतवन्तः । परिणामस्वरूपं मुगलानां कलात्मकरुचीनां प्रभावः दक्षिणस्य क्षेत्रीयसाम्राज्ये राजस्थानस्य राजपुत्रीय-साम्राज्ये अभवत्। परन्तु एतेन सह ते स्वकीयाः विशिष्टताः अपि संरक्षितवन्तः तथा च तासां विकासम् अपि कृतवन्तः। मुगलानाम् उदाहरणानि अनुसृत्य शासकानां तेषां राजभवनानां च चित्रणम् आरब्धम्। सहैव मेवाड-जोधपुर-बूंदी-कोटा-किशनगढ इत्यादिषु केन्द्रेषु पौराणिक-कथानां तथा च काव्यानां विषयस्य चित्रणं यथावत् चलत् आसीत्।

एतादृशम् एव एकम् अन्यद् अपि क्षेत्रम् आसीत्, आधुनिकहिमाचलप्रदेशस्य समीपं हिमालयस्य तलभूमेः (तलहटी) क्षेत्रम्।



चित्रम् - ८, होलीक्रीडन् महाराणारामसिंह द्वितीयः, राजपुत्रलघुचित्रम्, कोटा

सप्तदशशताब्द्याः अनन्तरेषु वर्षेषु, अस्मिन् क्षेत्रे लघुचित्रकलायाः कस्याश्चित् साहसपूर्णशैल्याः तथा च भावप्रवण-शैल्याः विकासोऽभवत्, या '**बसोहली**' शैली इति उच्यते । अत्र यत् लोकप्रसद्धिं पुस्तकं चित्रितं तत् भानुदत्तस्य रसमञ्जरी आसीत् । कलाकाराः १७३९ तमे नादिरशाहस्य आक्रमणात् तथा च दिल्लीविजयस्य परिणामस्वरूपं समतलक्षेत्राणाम् अस्थिरताभ्यः संरक्षणार्थं पर्वतीयं क्षेत्रं प्रति पलायनं कृतवन्तः तत्र गमनानन्तरम् एव तेषाम् आश्रयदातारः संरक्षकाः वा सिद्धाः आसन्, फलतः चित्रकार्याः काङ्गडाशैली विकसिता अभूत् ।



चित्रम् - ९ कृष्णः, राधा तस्याः च सख्यः तयोः मित्राणि,

पर्वतीयं लघुचित्रम्, काङ्गड़ा

अष्टादशशताब्द्याः मध्यं यावत् काङ्गडायाः कलाकाराः काञ्चित् नवीनां शैलीं विकसितवन्तः, येन लघुचित्रकलायाः विद्या नवपल्लिवता जाता । तेषां प्रेरणायाः स्रोतः, तत्रत्या वैष्णवपरम्परा आसीत् । नील-हरित-मृदु-वर्णानां प्रयोगः तथा च विषयाणां काव्यात्मकनिरूपणं कांगडाशैल्याः विशेषता आसीत् ।

स्मरणं भवेत्, यत् सामान्यस्त्रीपुरुषाः अपि पात्रेषु, भित्तिषु, वस्त्रेषु, कुट्टिमेषु स्वकीयकलां चित्रयन्ति स्म । कलायाः एतदुदाहरणेषु कानिचन एव अवशिष्टानि भवन्ति स्म । एतत् विपरीतं लघुचित्राणि प्रासादेषु सावधानतया संरक्ष्यन्ते स्म । येन शताब्दीः यावत् सुरक्षितानि भवेयुः ।

## बङ्गप्रदेशः- किमपि सूक्ष्मम् ईक्षणम्

### कस्याश्चित् क्षेत्रीयायाः भाषायाः प्रभावः

यथा वयं प्रारम्भे दृष्टवन्तः, वयं प्रायशः क्षेत्रस्य नामकरणं तत्रत्यानां जनानाम् उपयुज्यमानभाषाम् आधृत्य निर्णयामः, वयम् एतत्तर्कयामः यत् तत्रत्याः निवासिनः अहर्निशं बङ्गभाषायामेव व्यवहरन्ति स्म । किन्तु इयं काचित् एका मनोरमा वार्ता वर्तते, यत् सम्प्रति संस्कृतभाषातः बङ्गभाषायाः उत्पत्तिः मन्यते । प्रारम्भिक (ई.पू. प्रथमशताब्द्याः मध्यभागस्य) संस्कृतग्रन्थानाम् अध्ययनेन ज्ञायते यत् बङ्गजनाः संस्कृतात् निष्पन्नाभिः भाषाभिः न व्यवहरन्ति स्म । पुनः तर्हि नवीनभाषायाः उत्पत्तिः कथम् अभवत् ?

ई.पू. चतुर्थ-तृतीयशताब्द्याः बङ्गालमगधयोः (आधुनिकदक्षिणविहारस्य भागः) वाणिज्यिकसम्बन्धाः स्थापिताः जायमानाः आसन्, येन कारणेन सम्भवतः संस्कृतस्य प्रभावः वर्धमानः स्यात् । चतुर्थशताब्द्यां गुप्तवंशीयः शासकाः उत्तरबङ्गाले स्वकीय-राजनीतिकं नियन्त्रणं स्थापितवन्तः, तथा च तत्र ब्राह्मणान् निवासितवन्तः । अनेन प्रकारेण मध्यायाः गङ्गोपत्यकायाः भाषाप्रभावः तथा च सांस्कृतिकप्रभावः प्रबलतरौ अभवताम् । सप्तमशताब्द्यां चीनीयात्री ह्यूनसांगः अन्विष्टवान् यत् बङ्गाले सर्वत्र संस्कृतेन सम्बद्धभाषाणां प्रयोगः जायमानः आसीत् ।

अष्टमशताब्द्याः पालशासकानां संरक्षणे एकस्य क्षेत्रीयराज्यस्य उद्भवः अभवत् (द्वितीयाध्याये) । चतुर्दशषोडशशताब्द्योः मध्ये बङ्गप्रदेशे यवनसम्राजां शासनम् आसीत्,

*चित्रम् - १०*

*सर्वप्राचीनतमायाः बङ्गला-रामायणस्य तालपत्रनिर्मितायाः पाण्डुलिपेः किञ्चित् पृष्ठम्*



ये दिल्लीस्थितशासकेभ्यः स्वतन्त्राः आसन् (तृतीयाध्याये)। १५८६ तमे यदा अकबरः एतं प्रदेशं विजितवान्, तदा अस्य नाम प्रान्तः (सूबा) अभवत्। तस्मिन् काले यद्यपि प्रशासनस्य भाषा फ़ारसी आसीत्, तथापि बङ्गभाषा क्षेत्रीयभाषारूपेण विकसिता आसीत्।

वस्तुतः पञ्चदशशताब्दीपर्यन्तम् उपभाषा-क्षेत्रीयभाषयोः बङ्गसमूहः एकया सामान्यसाहित्यिकभाषया एकसूत्रितः अभवत्। एषा साहित्यिकभाषा तस्य क्षेत्रस्य पश्चिमभागस्य वार्तालापस्य भाषा आसीत्, यस्य वर्तमानं नाम **पश्चिमबङ्गाल** इति वर्तते। यद्यपि बङ्गभाषायाः उद्भवः संस्कृतभाषायाः एव अस्ति, परन्तु इयं स्वक्रमिकस्य विकासस्य अनेकसोपानतः अवतरिता वर्तते। तदतिरिक्तं संस्कृतेतरणां शब्दानां कश्चन विशालः शब्दागारः वर्तते, यः जनजातिजनानां भाषाभिः फ़ारसी-यूरोपीयाद्यनेकभाषाभिः च अनेकस्रोतोभ्यः संप्राप्तः अस्ति, आधुनिक-बङ्गभाषायाः कश्चन भागः जातः अस्ति।

बङ्गभाषायाः प्रारम्भिकसाहित्यं द्विधा विभक्तुं शक्यते, एकः भागः संस्कृतभाषायाः ऋणी वर्तते, द्वितीयभागः स्वतन्त्रः वर्तते। प्रथमे भागे संस्कृतमहाकाव्यानाम् अनुवादः, यथा मङ्गलकाव्यम्, शाब्दिकार्थेषु शुभम् अर्थात् माङ्गलिककार्यसम्पादनार्थं काव्यं यत् देवीदेवतासम्बद्धम् अस्ति तथा च भक्तिसाहित्यम् यथा –गौडीयवैष्णवान्दोलनस्य नेतुः श्रीचैतन्यदेवस्य जीवनकथाः (अष्टमाध्याये) इत्यादयः सन्ति।

द्वितीयभागे नाथसाहित्यम् अस्ति, यथा मैनामती-गोपीचन्द्रस्य गीतम्, धर्मठाकुरस्य पूजासम्बद्धाः कथाः, उपकथाः, लोककथाः गाथागीतानि च सन्ति।

**मैनामती, गोपीचन्द्रः तथा च धर्मठाकुरः**

नाथसम्प्रदायिनः संन्यासिनः भवन्ति स्म, ये विविधाः यौगिकाः क्रियाः कुर्वन्ति स्म।
इदं गीतविशेषं यत् प्रायः अभिनीयते, इदं ज्ञापयति यत् कथं राज्ञी मैनामती स्वकीयं पुत्रं गोपीचन्द्रं नैकविधासु बाधासु संन्यासं ग्रहीतुं प्रोत्साहितवती।
धर्मठाकुरः कश्चन लोकप्रियः क्षेत्रीयः देवः अस्ति, यस्य पूजा प्रायशः पाषाणस्य अथवा काष्ठस्य मूर्तिं संस्थाप्य क्रियते।

प्रथमप्रकारकाणां ग्रन्थानां कालनिर्णयः सरलः वर्तते, यतोहि एतादृश्यः अनेकाः पाण्डुलिपयः समुपलब्धाः सन्ति, यस्मिन् इदं सङ्केतितं वर्तते यत् तासां रचना पञ्चदशशताब्द्याः उत्तरार्धे अपि च अष्टादशशताब्द्याः मध्यभागे अभवत्। द्वितीयप्रकारकाः कृतयः मौखिकरूपेण कथ्यन्ते स्म श्रूयन्ते स्म च अतः तासां कालनिर्णयम् इदमित्थम् इति वक्तुं न शक्यते। ताः विशेषतया पूर्वबङ्गप्रान्ते लोकप्रियाः आसन्, यत्र अपेक्षाकृतः ब्राह्मणानां प्रभावः न्यूनः आसीत्।

## आध्यात्मिक-मार्गदर्शकाः (पीर) मन्दिराणि च

षोडशशताब्द्याः आरभ्य जनाः महत्या सङ्ख्यया पश्चिमबङ्गालस्य अल्प-उर्वरायुक्तक्षेत्राणि परित्यज्य दक्षिण-पूर्वि-बङ्गालस्य वनक्षेत्रेषु कच्छक्षेत्रेषु प्रवासं कर्तुम् आरब्धवन्तः आसन् । यथाकालं ते पूर्वदिशां प्रति अग्रेसराः जाताः ते वनानि कर्तयित्वा तत्रत्यां भूमौ धान्यकृषिं कर्तुम् आरब्धवन्तः । शनैः शनैः स्थानीयाः मत्स्यग्राहकाः अपि च स्थानान्तरीय-कृषिकर्तारः ये प्रायः जनजातीयसमुदायीयाः आसन् कृषकाणां नूतनेषु समुदायेषु सम्मिलिताः जाताः ।

ते पूर्व-नदी-मुख-पुलिन-प्रदेशस्य केन्द्रियभागे स्थितं ढाकानगरं स्वराजधानीम् उद्घोषितवन्तः । प्रायः अधिकारिणः कर्मचारिणः च भूमिं प्राप्य तत्र यवनमन्दिराणां निर्माणं कुर्वन्ति स्म, यानि एतेषां क्षेत्राणां धार्मिकस्य रूपान्तरणस्य केन्द्राणां रूपेण कार्यं कुर्वन्ति स्म ।

? भवतां विचारेण द्वितीयश्रेण्यः कृतयः लिखितरूपेण किमर्थं न स्थाप्यन्ते स्म ?

प्रारम्भे बहिर्भागात् आगत्य अत्र निवत्स्यमानाः जनाः एतासु अस्थिरासु परिस्थितिषु वसितुं काञ्चित् व्यवस्थाम् आश्वासनं च इच्छन्ति स्म । एतानि सुखसौविध्यानि तथा च आश्वासनानि तेभ्यः समुदायस्य नेतारः प्रदत्तवन्तः । एते नेतारः शिक्षकाणां निर्णायकानां च भूमिकायाः अपि कदाचित् निर्वहणं कुर्वन्ति स्म । कदाचित् एवमपि अनुमीयते स्म यत् एतेषां नेतॄणां पार्श्वे अलौकिक्यः शक्तयः सन्ति । स्नेहेन आदरेण च जनाः एतान् पीर इति कथयन्ति स्म ।

**पीर**

***फारसीभाषायाः शब्दः अस्ति यस्य अर्थः अस्ति आध्यात्मिक-मार्गदर्शकः***

अस्मिन् पीरवर्गे साधवः अथवा सूफीजनाः अन्ये च धार्मिकाः महानुभावाः साहसिनः उपनिवेशिनः देवत्वप्राप्तसैनिकाः एवञ्च योद्धारः विभिन्नाः हिन्दुबौद्धदेवीदेवताः जीवात्मानः अपि सम्मिलिताः आसन् । पीराणां पूजापद्धतयः अतीव लोकप्रियाः अभवन् अपि च तेषां स्मारकाणि बङ्गाले सर्वत्र दृश्यन्ते ।

बङ्गाले पञ्चदशशताब्द्याः परवर्तिवर्षेषु मन्दिरनिर्माणस्य कार्यं बाहुल्येन जातं यत् एकोनविंशतिशताब्द्याः अन्ते समाप्तिं गतम् । वयं दृष्टवन्तः यत् द्वितीयाध्याये पञ्चमाध्याये च मन्दिराणि अन्यानि धार्मिकाणि च भवनानि प्रायः तैः जनैः समूहैः च निर्मीयन्ते स्म ये शक्तिशालिनः जायमानाः आसन् । ते एतेषां माध्यमेन स्वशक्तेः भक्तिभावस्य च प्रदर्शनं कर्तुम् इच्छन्ति स्म । बङ्गप्रान्ते साधारणाभिः इष्टिकाभिः मृत्तिकाभिः च निर्मितानि अनेकानि मन्दिराणि निम्नसामाजिक-समूहैः यथा कालू (तैली) इत्यनेन कंसारी इत्यादिभिः (घण्टाधातोः शिल्पिनः ) यत् साहाय्यं कृतं तेन समर्थेन निर्मितानि आसन् । यूरोपीयेषु वाणिज्यसमूहेषु आगतेषु सत्सु नूतनाः आर्थिकाः अवसराः उत्पन्नाः । एतैः सामाजिकसमूहैः सम्बद्धैः अनेकैः परिवारैः एतेभ्यः अवसरेभ्यः लाभः

गृहीतः। यथा यथा जनानां सामाजिका आर्थिकस्थितिः उन्नता जाता ते एतेषां मन्दिराणां स्मारकाणां यथा यथा जनानां सामाजिका आर्थिकस्थितिः उन्नता जाता ते एतेषां मन्दिराणां स्मारकाणां वा निर्माणेन स्वस्थितिं प्रतिष्ठां च प्रदर्शितवन्तः। यदा स्थानीयाः देवीदेवताः ये पूर्वं ग्रामेषु पर्णकुटीरेषु एव पूज्यन्ते स्म तेषां देवीदेवतानां कृते ब्राह्मणाः मान्यतां प्रदत्तवन्तः तदा तेषां प्रतिमाः मन्दिरेषु स्थाप्यमानाः जाताः ।





**जीववादः**

**इयं मान्यता यत् वृक्ष-पादपेषु जडवस्तुषु प्राकृतिकघटनासु च अपि जीवात्मा अस्ति।**

? अत्र प्रदत्तस्य मन्दिरस्य तुलनां द्वितीयाध्याये प्रदत्तेन मन्दिरेण सह कुर्वन्तु।

***चित्रम् - ११ (वामतः) कश्चित् पर्णकुटीरः***

***चित्रम् - १२ (दक्षिणतः) किञ्चन चौचालामन्दिरम्***



चित्रम् – १३

गोपीभिः सार्धं कृष्णः, श्यामपुरमन्दिरस्य पक्वमृत्तिकायाः एका पट्टिका, विष्णुपुरम् ।

एतेषां मन्दिराणाम् आकृतिः बङ्गालस्य छदियुक्तपर्णकुटीराणां दोचाला अर्थात् छदिद्वययुक्तस्य कुटीरस्य अपि च चौचाला अर्थात् छदिचतुष्टययुक्तस्य कुटीरस्य इव भवति स्म । पञ्चमाध्याये वर्णितं बङ्गालिमन्दिरशिखरं स्मरन्तु । यतः मन्दिराणां स्थापत्यकलायां विशिष्टबङ्गशैल्याः प्रादुर्भावः जातः । अपेक्षानुगुणम् अधिका जटिला चौचाला अर्थात् छदिचतुष्टययुक्ता, आकृत्या चतुरत्रिकोणीयछदयः भित्तिचतुष्टयेषु स्थाप्यन्ते स्म, याः उपरि तिर्यक्-रेखाम् अथवा बिन्दुं यावत् गच्छन्ति स्म । मन्दिराणि सामान्यतया एकस्मिन् वर्गाकारे चत्वरे निर्मीयन्ते स्म । तेषाम् अन्तर्भागेषु काचित् अपि सज्जा न भवति स्म, परन्तु अनेकमन्दिराणां बाह्याः भित्तयः चित्रकलाभिः अलङ्कृतपाषाणपट्टिकाभिः मृत्तिकायाः पट्टिकाभिः अलङ्कृताः भवन्ति स्म । केषुचित् मन्दिरेषु विशेषतया पश्चिमबङ्गालस्य बांकुरामण्डलस्थेषु मन्दिरेषु एतादृशं सज्जीकरणम् अत्यन्तम् उत्कृष्टं जातम् आसीत् ।

***मत्स्यः भोजनरूपेण***

परम्परागताः भोजमसम्बद्धाः अभ्यासाः सामान्यतया स्थानीयरूपेण उपलभ्यमानेषु खाद्यपदार्थेषु आश्रिताः भवन्ति । बङ्गालः कश्चित् नादेयसम-क्षेत्रम् अस्ति ,यत्र मत्स्यानां व्रीहीनां च उत्पादनं बाहुल्येन भवति । अतः एतत् स्वाभाविकम् अस्ति यत् एततद्वस्तुद्वयम् एव निर्धन-बङ्गानां भोजने अपि प्रमुखम् अस्ति । मत्स्यग्रहणं तत्रत्यानां प्रमुखः व्यवसायः आद्यावधिः वर्तते अपि च बङ्गसाहित्ये मत्स्यस्य पदे पदे उल्लेखः उपलभ्यते । एतस्मात् अधिकं किं वा भवितुम् अर्हति यत् मन्दिराणां बौद्धविहाराणां च भित्तिषु याः मृण्मयाः

पट्टिकाः संलग्नाः सन्ति तासु अपि मत्स्यान् स्वच्छीकुर्वन्तः अपि च तान् कण्डोलेषु पूरयित्वा आपणं प्रति नयन्तः जनाः दर्शिताः सन्ति।
ब्राह्मणाः सामिषं भोजनं कर्तुम् अधिकारिणः न आसन् परन्तु स्थानीये आहारे मत्स्यस्य लोकप्रियतां दृष्ट्वा ब्राह्मणधर्मस्य विशेषज्ञैः बङ्गस्थब्राह्मणानां कृते एतस्मिन् निषेधे कामचारिता प्रदत्ता । "बृहद्धर्मपुराणम्" यत् बङ्गे रचितत्रयोदशशताब्द्याः संस्कृतग्रन्थः अस्ति अनेन ग्रन्थेन स्थानीयब्राह्मणाः विशिष्टप्रजातियुक्तान् मत्स्यान् खादितुम् आदिष्टाः।



(चित्रम् - १४) गृहस्य उपयोगाय मत्स्यान् सज्जीकुर्वत्, विशालक्ष्मीमन्दिरतः पक्वमृत्तिकायाः किञ्चित् पक्वमृण्मयफलकम्, आरामबागः इति

अन्यत्र

## यूरोपे राष्ट्रराज्यानाम् आविर्भावः

अष्टादशशताब्द्याः अन्तपर्यन्तं यूरोपीयाः जनाः आत्मानं साम्राज्यरूपेण मन्यन्ते स्म यथा आस्ट्रिया-हंगेरीसम्राज्ययोः प्रजाः अथवा कस्यचित् क्राईस्तमन्दिरस्य (चर्च) यथा यूनानिरूढिवादिनः क्राईस्तमन्दिरस्य (चर्च) सदस्याः मन्यन्ते स्म । परन्तु अष्टादशशताब्द्याः अन्तिमेषु दशकेषु जनाः आत्मानं एतादृशस्य समुदायस्य रूपेण अपि परिचेतुम् आरब्धवन्तः ये काश्चित् भाषां यथा फ्रेंच जर्मन वा भाषां वदन्ति स्म । एकोनविंशत्याः शताब्द्याः आरम्भे रोमानियायां विद्यालयीय-पाठ्यपुस्तकानि ग्रीकभाषायाः स्थाने रोमानियाभाषायां लिखितानि अपि च हंगरीदेशे लैटिनभाषायाः स्थाने हंगेरियनभाषा राजभाषायाः रूपेण स्वीकृता । एतादृशीभिः अन्याभिः च प्रक्रियाभिः जनाः बोधिताः यत् प्रत्येकं भाषाभाषिसमुदायः पृथक् राष्ट्रम् आसीत् । एकोनविंशतिशताब्द्याः अन्तिमेषु दशकेषु इटलीजर्मनी इत्येतयोः एकीकरणस्य कृते जातै आन्दोलनैः एतस्याः भावनायाः द्राढ्यर्थम् अधिकं बलं प्रदत्तम् ।

## कल्पनां कुर्वन्तु



*भवान् कश्चन राजपूत-राजकुमारः वर्तते । भवान् स्वस्य कथाम् उत्तमतया केन प्रकारेण श्रावयितुम् एषिष्यति ।*

### पुनः स्मरन्तु

*१ निम्नलिखितान् मेलयन्तु :*

| | |
|---|---|
| *अनन्तवर्मनः* | *केरलम्* |
| *जगन्नाथः* | *बङ्गालः* |
| *महोदयपुरम्* | *उडीसा* |
| *लीला-तिलकम्* | *काङ्गडा* |
| *मङ्गलकाव्यम्* | *पुरी* |
| *लघुचित्रम्* | *केरलम्* |

बीजशब्दः

शास्त्रीयः

लघुचित्रम्

धर्मगुरुः

भाषा

*२ मणिप्रवालं किं वर्तते ? अस्यां भाषायां लिखितपुस्तकस्य नाम सूचयन्तु ?*

*३ कत्थकस्य प्रमुखाः संरक्षकाः के आसन् ?*

*४ बङ्गालस्य मन्दिराणां स्थापत्यकलायाः महत्त्वपूर्णानि लक्षणानि कानि सन्ति ?*

### आयान्तु विचारयामः

*५ चारण-भाटाः शूरवीराणाम् उपलब्धीनाम् उद्घोषणां किमर्थम् अकुर्वन् ?*

*६ वयं सामान्यजनानां तुलनायां शासकानां सांस्कृतिकीनां रीतीनां परम्पराणां विषये बहु अधिकं किमर्थं जानीमः ?*

*७ विजेतारः किमर्थं पुरीस्थितस्य जगन्नाथस्य मन्दिरे नियन्त्रणप्राप्तये प्रयत्नान् कृतवन्तः ?*

*८ बङ्गाले मन्दिराणि किमर्थं निर्मितानि ?*

### आगच्छन्तु कृत्वा पश्यामः

*९ भवनानां प्रदर्शनकलानां चित्रकलानां विशेषसन्दर्भे स्वस्य क्षेत्रस्य संस्कृतेः सर्वाधिकमहत्त्वपूर्णानां लक्षणानां विशेषतानां वर्णनं कुर्वन्तु ।*

*१० किं भवन्तः (क) भाषणाय (ख) पठनाय (ग) लेखनाय च भिन्नानां भाषाणां*

*प्रयोगं कुर्वन्ति ? एतेषु कस्याश्चित् एकस्याः भाषायाः कस्याश्चित् प्रमुखरचनायाः विषये लिखन्तु तथा च चर्चयन्तु यत् भवन्तः एतत् रुचिपूर्णम् इति किमर्थं भावयन्ति ?*

*११ उत्तरात् पश्चिमात् दक्षिणात् पूर्वात् मध्यभारतात् च एकम् एकं राज्यं चिन्वन्तु । एतेषु प्रत्येकं राज्यस्य तेषां भोजनानां सूचीं कुर्वन्तु यानि सामान्यतया सर्वैः क्रियन्ते । भवन्तः तत्र किञ्चित् अन्तरं समानतां वा पश्यन्ति, तर्हि तद् विवेचयन्तु ।*

*१२ एतेभ्यः प्रत्येकं क्षेत्रेभ्यः पञ्चानां पञ्चानां राज्यानां सूचीं पुनः निर्मान्तु तथा च एतत् सूचयन्तु यत् प्रत्येकस्मिन् राज्ये महिलाभिः तथा च पुरुषैः सामान्यतया कानि वस्त्राणि धृतानि सन्ति । स्वस्य निष्कर्षेषु चर्चयन्तु ।*